## चादयोऽसत्त्वे । (५७/२०)

चादयो निपातसञ्ज्ञा भवन्ति, न चेत् सत्त्वे वर्तन्ते । प्रसज्यप्रतिषेधोऽयम् । सत्त्वम् इति द्रव्यमुच्यते ।

च । वा । ह । [1]अह । एव । एवम् । नूनम् । शश्वत् । [2]युगपत् । सूपत् । कूपत् । [3]कुवित् । नेत् । चेत् । [4]चण् । [5]कच्चित् । यत्र । [6]नह । हन्त । [7]माकिम् । [8]नकिम् । माङ । माङो ङकारो विशेषणार्थः, 'माङि लुङ' (३.३.१७५/२२१९) इति । इह न भवति, मा भवतु, मा [9]भविष्यति । नञ्[10] । यावत् । तावत् । [11]त्वा । [12]त्वै । [13]द्वै । रै । श्रौषट् । [14]वौषट् । स्वाहा । वषट् । स्वधा[15] । ओम् । किल । तथा । [16]अथ । सु । स्म । अस्मि । अ । इ । उ । ऋ । ऌ । ए । ऐ । ओ । औ । अम्[17] । [18]तक् । उञ् । उकञ् । वेलायाम् । मात्रायाम् । यथा । यत् । यम् । तत् । किम् । पुरा । अद्धा । धिक् । हाहा । हे । है । प्याट् । पाट् । थाट् । अहो । उताहो । हो । तुम् । तथाहि । खलु । आम् । आहो । अथो । ननु । मन्ये । मिथ्या । असि । ब्रूहि । तु । नु । इति । इव । वत् । चन । बत । इह । शम् । कम् । अनुकम् । नहिकम् । हिकम् । सुकम् । सत्यम् । ऋतम् । [19]श्रद्धा । इद्धा । [20]मुधा । नो चेत् । न चेत् । नहि । जातु । कथम् । [21]कुतः । कुत्र । [22]अव । अनु । हाहौ । हैहा । ईहा । आहोस्वित् । छम्बट्[23] । खम् । दिष्टचा । पशु । वट् । सह । [24]आनुषक् । अङ्ग । फट् । ताजक् । अये । [25]अरे । [26]चटु । बाट् । कुम् । खुम् । घुम् । हुम् । आईम् । शीम् । [27]सीम् । वै[28] ।

उपसर्गविभक्तिस्वरप्रतिरूपकाश्च निपाताः (ग.सू.१६) । उपसर्गप्रतिरूपकाः —

अवदत्तं विदत्तं च प्रदत्तं चादिकर्मणि ।
सुदत्तमनुदत्तं च निदत्तमिति चेष्यते ॥

'अच उपसर्गात्तः' (७.४.४७/३०७८) इति तत्वं न भवति । [29]दुर्नीतम् । दुर्नयः । [30]दुर्निर्णयः ॥ 'उपसर्गात्[0]' (८.४.१४/२२८७) इति णत्वं न भवति । असत्त्वे इति किम्? पशुर्वै पुरुषः । पशुः पुरोडाशः[31] निपातप्रदेशाः—'स्वरादिनिपातमव्ययम्' (१.१.३७/४४७) इत्येवमादयः ॥

## प्रादयः । (५८/२१)

प्रादयोऽसत्त्वे निपातसञ्ज्ञा भवन्ति[32] । प्र । परा । अप । सम् । अनु । अव । निस् । निर् । दुस् । दुर् । वि । आङ । नि । अधि । अपि । अति । सु । उत् । अभि । प्रति । परि । उप । पृथग्योगकरणमुत्तरसञ्ज्ञाविशेषणार्थम् । 'उपसर्गाः क्रियायोगे' (१.४.५९/२२) इति चादीनामुपसर्गसञ्ज्ञा मा भूत् । असत्त्वे इत्येव, [33]परा जयति सेना ॥

---

1. नास्ति फ. 2. नास्ति फ. 3. क्वचित् क, कृत्, चिण् ड. 4. चिण् ड. 5. क्वचित् क.
6. नहि क, तर्हि अ. 7. नवो इत्यधिकम् क. 8. नास्ति फ, न । न किर् ड. 9. करिष्यति ह. 10. नकारलोपो नञः
इति विशेषः कार्यः इत्यधिकम् अ.क. 11. नास्ति अ. 12. वै क, मानाक् जोषम् ह. 13. तु क. 14. नास्ति
अ.फ. 15. कम्, न तु, तथाहि, खलु अहो इत्यधिकम् क. 16. अधस् अ. 17. अ मा नो ना प्रतिषेधे इत्य-
धिकम् अ.क.फ. 18. नास्ति फ. 19. अद्धा फ. 20. नास्ति ड.फ. 21. नास्ति फ. 22. अविक् ड.
23. वा इत्यधिकम् अ. 24. अनुषक् ड. 25. ओ ब. 26. चाटु ब.ड. 27. सीम ड. 28. भूयस् अलं
हुम् सुष्ठु पुरस् कामं आशु तर्हि अन्तरेण रहस् सपदि इत्यधिकम् ह, आकृतिगणश्चायं इति चादिः इत्यधिकम् अ.ड.
29. नास्ति फ. 30. नास्ति ड. 31. अनिपातत्वात् सुलोपो न भवति इत्यधिकम् फ.ह. 32. के पुनः प्रादयः
इत्यधिकम् क. 33. पराः सेनाः अ.ब.क, परा जयन्ति सेनाः ड.